# MT EDUCARE LTD.

**QUEST- II (Semi Prelim - II)**
**2017 - 18**

**CBSE - X**

**PORTION : Full Portion**

**Roll No.** | | | | | | | |  **Code No. 52/1**

**Series LRH/1**

| | | | |
|---|---|---|---|
| • खण्डः क<br>Section A | : अपठितांश-अवबोधनम् / अपठित-अवबोधन<br>: Unseen Reading Comprehension | | 10 अङ्काः |
| • खण्डः ख<br>Section B | : रचनात्मककार्यम् / रचनात्मक-कार्य<br>: Writing Skills | | 15 अङ्काः |
| • खण्डः ग<br>Section C | : अनुप्रयुक्तव्याकरणम् / अनुप्रयुक्त व्याकरण<br>: Applied Grammar | | 25 अङ्काः |
| • खण्डः घ<br>Section D | : पठित-अवबोधनम् / पठित-अवबोधन<br>: Reading Comprehension | | 30 अङ्काः |

***Time allowed*** **:** 3 hours ***Maximum Marks*** **:** 80

## COMMUNICATIVE SANSKRIT

**General Instructions :**

(i) The question paper has four sections.

(ii) The answers have to be written in a separate answer-sheet.

(iii) The answers to each section must be written in a serial at one place.

(iv) Don’t write answers in the question paper.

(v) Write the question number according to the question paper.

(vi) Answer all the questions in **Sanskrit**.

## खण्डः 'क'
## (SECTION A)
## अपठित अवबोधनम् (Unseen Reading Comprehension)

**Q.1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

एकदा एकः कत्तर्व्यपरायणः नगररक्षकः इतस्ततः भ्रमन् एकम् अशीतिवर्षीयं महापुरुषम् अपश्यत् । सः आम्रवृक्षस्य आरोपणे तल्लीनः आसीत् । इदं दृष्ट्वा नगररक्षकः तं महापुरुषम् अवदत् - अवलोकनेन प्रतीयेत यत् यदा एषः वृक्षः फलिष्यति तदा भवान् जीवितः न भविष्यति । अतः किमर्थं वृथा परिश्रमं करोति भवन्तः ? महापुरुषः हसित्वा अवदत् - पश्यन्तु एतान् फलयुक्तान् वृक्षान् । एतेषाम् आरोपणं मया न कृतं परं फलानि अहं खादित्वा सन्तुष्टः भवामि । अतः यदा मम आरोपितस्य वृक्षस्य फलानि अन्ये खादिष्यन्ति, अहं पुनः प्रसन्नः भविष्यामि । महापुरुषस्य वचनं श्रुत्वा तं च नमस्कृत्य नगररक्षकः उक्तवान् - अनुकरणीया एव सज्जनानां सज्जनता ।

**I] एकपदेन उत्तरत ।** **[2]**

(i) नगररक्षकः कतिवर्षीयं महापुरुषम् अपश्यत् ?

(ii) महापुरुषः कस्मिन् कार्ये तल्लीनः आसीत् ?

**II] पूर्णवाक्येन उत्तरत ।** **[4]**

(i) महापुरुषः कदा पुनः प्रसन्नः भविष्यति ?

(ii) महापुरुषस्य वचनं श्रुत्वा नगररक्षकः किम् उक्तवान् ?

**III] प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।** **[2]**

(i) 'वृक्षान्' इति पदस्य विशेषणपदं किम् अस्ति ?
(अ) एतान्  (ब) हसित्वा  (क) फलयुक्तान्  (ड) महापुरुषः

(ii) अस्मिन् गद्यांशे 'निष्प्रयोजनम्' इत्यर्थे कः शब्दः प्रयुक्तः ?
(अ) किमर्थम्  (ब) वृथा  (क) तल्लीनः  (ड) अन्ये

(iii) अस्मिन् गद्यांशे 'दुर्जनानाम्' इति पदस्य कः विलोमशब्दः ?
(अ) सज्जनानाम्  (ब) प्रसन्नः  (क) सज्जनता  (ड) अनुकरणीया

(iv) 'भवामि' इति क्रियापदस्य कर्ता कः ?
(अ) नगररक्षकः  (ब) महापुरुषः  (क) तं  (ड) अहं

**IV] अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत ।** **[2]**

**खण्डः 'ख'**

**(SECTION B)**

**रचनात्मकं कार्यम् (Writing Skills)**

**Q.2. भवान् शौर्यः । विद्यालयस्य शैक्षिकभ्रमणस्य कार्यक्रमे सम्मिलितुं अनुमतिहेतोः पितरं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पुरयित्वा पत्रं पुनः लिखत । [5]**

विवेकानन्दछात्रावासः

i) ......

तिथि........

माननीयाः पितृवर्याः ।

सादरं ii) ......

भवतः पत्रं प्राप्तम् । प्राप्य च प्रसन्नः अस्मि । अत्र अग्रिमे मासे विद्यालयस्य iii) ...... कार्यक्रमः निश्चितः अस्ति । अध्यापिकाः अस्मान् हिमाचलप्रदेशे iv) ...... नेष्यन्ति । पर्वतदर्शनाय मम v) ...... इच्छा वर्तते । एतदर्थं मया vi) ...... पञ्चशतम् रूप्यकाणि vii) ...... अतः एतत् कृते भवतः अनुमतिः अपि अपेक्षिता अस्ति । एकः viii) ...... अध्यापकः अपि अस्माभिः सह गमिष्यति । गृहे ix) ...... मे प्रणामाः निवेदनीयाः ।

भवदीयः पुत्रः ।

x) ......

**मञ्जूषा** : i) कक्षाध्यापिकायै, ii) शैक्षिकभ्रमणस्य, iii) महती, iv) नमोनमः, v) दातव्यानि, vi) सर्वेभ्यः, vii) शौर्यः, viii) चेन्नईतः, ix) शिमलानगरम्, x) वरिष्ठः

**Q.3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत । [10]**



**मञ्जूषाः** (बालकाः, बालिकाः, इतस्ततः, रज्ज्वा, दोलायाम्, वृक्षः, कन्दुकेन, प्रसन्नाः, आनन्देन, कूर्दन्ति, मेघाः, आरोहति, धावन्ति)

**अथवा**

**Q.3. 'प्रातःकाल' इति विषयम् अधिकृत्य मञ्जूषा - प्रद्रत्त - शब्दानां सहायतया पञ्च संस्कृत वाक्येषु एकम् अनुच्छेदं लिखत । [10]**

**मञ्जूषा** : (सूर्यः, आकाशः, भवति, प्रकाशः, खगाः, रक्तः, कूजन्ति, उद्याने, जनाः प्रसन्नाः उदयति, भ्रमन्ति)

## खण्डः 'ग'

## (SECTION C)

## अनुप्रयुक्त व्याकरणम् (Applied Grammar)

**Q.4. अधोलिखितवाक्येषु रेखाङ्कितेषु पदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत । [4]**

(i) आगच्छतु + अत्र मोहन ।

(ii) प्राचीनकालेऽपि आण्विक - अस्त्राणि आसन् ।

(iii) त्वम् एकं परिच्छेदं लिखत ।

(iv) कः + अयम् अनर्थः क्रियते एताभ्यां वीराभ्याम् ।

**Q.5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । [4]**

(i) महर्षिपाणिनिना **अष्टाध्यायी** विरचिता ।

(अ) अष्ट अध्यायी इति । (ब) अष्टानां अध्यायीनां समाहारः ।

(क) अष्टः अध्यायः यस्य सः । (ड) अष्टानां अध्यायानां समाहारः ।

(ii) नरः **साधुवृत्तिं** समाचरेत् ।

(अ) साधुम् वृत्तिम् । (ब) साधूनां वृत्तिम् ।

(क) साधुनां वृत्तिम् । (ड) साधोः वृत्तिम् ।

(iii) शिवीनां राजा **वृद्धान् उपसेवितुं शीलं यस्य सः** आसीत् ।

(अ) वृद्धोनोपसेविन् । (ब) वृद्धोपसेवी ।

(क) वृद्धोपसेविन् । (ड) वृद्धोपसेवः ।

(iv) **शक्तिम् अनतिक्रम्य** दानं कुर्यात् ।

(अ) यथाशक्तिम् । (ब) यथाशक्तिः ।

(क) यथाशक्ती । (ड) यथाशक्ति ।

**Q.6. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य चित्वा लिखत । [4]**

(i) **नायिका** सुन्दरम् अभिनयम् अकरोत् ।

(अ) नायिक + टाप् (ब) नायिक + ठक्

(क) नायक + टाप् (ड) नायक + ठक्

(ii) भगवद् गीता प्रतिदिनं **श्रु + तव्यत्** ।

(अ) श्रूतव्यम् (ब) श्रोतव्यम्

(क) श्रोतव्या (ड) श्रूतव्या

(iii) अस्माभिः **वेद + ठक्** ग्रन्थाः पठिताः ।

(अ) वैदिकाः (ब) वेदिकाः

(क) वैदिकः (ड) वेदिकः

(iv) **हसन्त्यः** बालिकाः पाठशालां गच्छन्ति ।

(अ) हस् + णिनि / इन् (ब) हस् + ङीप्

(क) हस् + टाप् (ड) हस् + शतृ

**Q.7. अधोलिखिते संवादे मञ्जूषायां दत्तैः पदैः वाच्यापरिवर्तनं कृत्वा पूरयित्वा च पुनः लिखत । [3]**

(i) माता - किं त्वं गृहपाठं करोषि ?

दुहिता - आम्, मया गृहपाठः ............ ।

(ii) दुहिता - किं पिता गृहं आगच्छति ?

माता - न, ............ गृहं अधुना अपि न आगम्यते ।

(iii) दुहिता - किं आवाभ्यां रोटिकाः पच्यन्ते ?

माता - आवां ............ पचतः ।

**मञ्जूषा** : (पित्रा, रोटिकान्, क्रियते)

**Q.8. अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधक - शब्दैः पूरयत । [2]**

(i) राकेशः प्रातः (**5.00**) उत्तिष्ठति ।

(ii) सः (**8.15**) कार्यालयं याति ।

**Q.9. अधोलिखितवाक्येषु रिक्तस्थानानि उचितै अव्ययपदैः पूरयित्वा पुनः लिखत । [4]**

(i) बालकौ मात्रा ............ उद्याने क्रीडन्तः।

(ii) वायोः ............ जीवनम् अशक्यम् ।

(iii) कोलाहलं ............ कुरु ।

(iv) यत्र अग्निः ............ धूमः ।

**मञ्जूषा** : (तत्र, सह, मा, विना)

**Q.10. अधोलिखितवाक्येषु अशुद्धयः संशोधनं कृत्वा रेखाङ्कितपदेषु पुनः लिखत । [4]**

(i) त्वम् असत्यं **वदति** ।

(ii) शिक्षकः **सर्वाः** छात्रान् पाठयति ।

(iii) पुरा एकः महात्मा **अस्ति** ।

(iv) **एषा** क्रीडानिपुणः वर्तते ।

## खण्डः 'घ'
## (SECTION D)
## पठित-अवबोधनम् (पठित-अवबोधन) (Reading Comprehension)

**Q.11.** अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।

अ) **गद्यांशः ।**

अथ पूर्वमित्रं दुष्टबुद्धिः प्रच्छन्नभाग्यस्य धनागमवृत्तान्तं श्रुत्वा कदाचित् मध्यरात्रे तस्य एव गृहे चौर्यार्थं सन्धि-खननसुयोगम् विलोकयन् स्थितः । तस्मिन्नेव काले सुप्तोत्थितः प्रच्छन्नभाग्यः सम्भ्रान्तचित्तः स्वपत्नीं सम्बोध्य उवाच - अहो विचित्रः स्वप्नो मया दृष्टः । अस्माकं क्षेत्रे अश्वत्थतरुमूले सुवर्णपूरितः कलशः विद्यते इति ।

**I] एकपदेन उत्तरत ।** **[1]**

(i) प्रच्छन्नभाग्यस्य पूर्वमित्रं कः ?

(ii) सुप्तोत्थितः प्रच्छन्नभाग्यः किम् सम्बोध्य उक्तवान् ?

**II] पूर्णवाक्येन उत्तरत ।** **[2]**

प्रच्छन्नभाग्यः स्वप्ने किम् अपश्यत् ?

**III] भाषिक कार्यम् । प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत ।** **[2]**

(i) 'दृष्टः' इति पदे कः प्रत्ययः ?
(अ) शतृ (ब) शानच् (क) क्त (ड) क्त्वा

(ii) 'अस्ति' इत्यर्थे अनुच्छेदे किं पदे प्रयुक्तम् ?
(अ) स्थितः (ब) दृष्टः (क) उवाच (ड) विद्यते

(iii) 'तस्मिन्नेव काले सुप्तोत्थितः प्रच्छन्नभाग्यः' इत्येषु विशेषणपदं किम् ?
(अ) तस्मिन्नेव (ब) सुप्तोत्थितः (क) काले (ड) प्रच्छन्नभाग्यः

(iv) 'सम्बोध्य' इति पदे का मूलधातुः ?
(अ) बुध् (ब) बोध् (क) बोध्य (ड) सम्बुद्ध

**IV] प्रच्छन्नभाग्यस्य धनागमवृत्तान्तं श्रुत्वा पूर्वमित्रं दुष्टबुद्धिः तस्य एव गृहे चौर्यार्थं सन्धि - खननसुयोगं विलोकयन् स्थितः ।** **[1]**

अत्र कीदृशो भावः प्रकटितः ?

आ) **पद्यांशः ।**

क्रोधाद्भवति संमोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ।।५।।

**I] एकपदेन उत्तरत ।** **[2]**

(i) क्रोधात् किम् उद्भवति?

(ii) मनुष्यस्य विनाशस्य मूलभूतकारणं किम् ?

**II] पूर्णवाक्येन उत्तरत ।** **[2]**

(i) बुद्धिनाशः कथम् भवति ?

**III] भाषिक कार्यम् ।** **[2]**

(i) 'निर्माणम्' इति पदस्य कः विलोमशब्दः अत्र प्रयुक्तः ?
(अ) भ्रंशः (ब) विभ्रमः (क) नाशः (ड) संमोहः

(ii) 'प्रणश्यति' इति पदे का मूलधातुः ?
(अ) णश् (ब) नाश् (क) प्रणश् (ड) नश्

(iii) 'भवति' पदस्य अत्र कोऽर्थः ?
(अ) उत्पन्नः भवति (ब) उपपन्नः भवति (क) जायते (ड) प्रणश्यति

(iv) 'सम्मोहात्' इति पदे का विभक्तिः ?
(अ) षष्ठी (ब) प्रथमा (क) पञ्चमी (ड) सप्तमीः

इ) **नाट्यांशः ।**

युधिष्ठिरः - सम्प्रति आश्वस्तः अस्मि । मन्ये सः ब्रह्मास्त्रप्रयोगं न करिष्यति ।
श्रीकृष्णः - तर्हि न जानासि तस्य मनोवृत्तिम् । पितुः उपदेशेन असन्तुष्टः स एकदा द्वारकापुरीम् आगच्छत् । ब्रह्मास्त्रं दत्त्वा सः सुदर्शनचक्रम् अवाञ्छत् ।
युधिष्ठिरः - (साश्चर्यम्) कथं चक्रम् इति !
श्रीकृष्णः - आम् ! मया कथितम् । नाहं त्वत्तः ब्रह्मास्त्रम् इच्छामि । यदि त्वं मम गदां, शक्तिं, धनुः चक्रं वा इच्छसि, तुभ्यं ददामि ।
युधिष्ठिरः - ततस्ततः ।
श्रीकृष्णः - स तु चक्रम् एव अयाचत । गृहाण चक्रम् इति उक्तः सः सव्येन पाणिना चक्रं गृहीतवान्, किन्तु सः तत् चक्रं स्वस्थानात् संचालयितुम् अपि समर्थः न अभवत्।
युधिष्ठिरः - जानीमः भवतः दिव्यां शक्तिम् ।

**I] एकपदेन उत्तरत ।** **[1]**

(i) पितुः उपदेशेन असन्तुष्टः अश्वत्थामा कुत्र आगच्छत् ?

(ii) अश्वत्थामा किम् अयाचत ?

**II] पूर्णवाक्येन उत्तरत ।** **[2]**

द्रोणपुत्रः किं कर्तुं समर्थः न अभवत् ?

**III] भाषिक कार्यम् ।** **[2]**

(i) 'सव्येन पाणिना' अत्र किं विशेषणपदम् ?

(अ) सव्यः (ब) पाणिः (क) सव्येन (ड) पाणिनाः

(ii) 'तुभ्यं ददामि' अत्र 'तुभ्यम्' पदं कस्मै प्रयुक्तम् ?

(अ) युधिष्ठिराय (ब) द्रौणिने (क) अर्जुनाय (ड) श्रीकृष्णाय

(iii) 'अधुना' इत्यर्थे किं पदं प्रयुक्तम् ?

(अ) ततस्ततः (ब) अपि (क) कथं (ड) सम्प्रति

(iv) 'गृहीतवान्' अस्मिन् पदे कः प्रत्ययः प्रयुक्तः ?

(अ) तवत् (ब) क्तवतु (क) क्त (ड) तुमुन्

**IV] 'ब्रह्मास्त्रं दत्त्वा सः सुदर्शनचक्रम् अवाञ्छत्' । अनेन वाक्येन कीदृशो भावः प्रतीयते ?** **[1]**

**Q.12. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।** **[4]**

(i) **चतुर्णां युगानां** समूहः एव महायुगम् ।

(ii) **ईटानगरम्** अरुणाचलप्रदेशस्य राजधानी ।

(iii) **वर्षर्तौ** राजहंसः मानसं पलायते ।

(iv) राज्ञः नेत्रदानार्थं निश्चयं ज्ञात्वा **अमात्याः** विषण्णाः अभवन् ।

**Q.13. मञ्जूषात् समुचितपदानि चित्वा श्लोकद्वयस्य अन्वयं पूरत ।** **[4]**

(i) अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ।।

**अन्वय** : यत् वाक्यम् i) ...... सत्यं ii) ...... च (तथा) स्वाध्याय iii) ...... च एव iv) ...... तपः उच्यते ।

(ii)
आयुषः क्षणमेकोऽपि, न लभ्यः स्वर्णकोटिकैः ।
स चेन्निरर्थकं नीतः, का नु हानिस्ततोऽधिका ॥

**अन्वय :** आयुषः एकः i) ...... अपि स्वर्णकोटिकैः न ii) ...... । स चेत् iii) ...... नीतः ततः iv) ...... नु हानिः का ?

**मञ्जूषा :** (निरर्थकम्, वाङ्मयं, अनुद्वेकरं, क्षणम्, अधिका, प्रियहितं, लभ्यः, अभ्यसनं)

**Q.14. अधोलिखितेषु वाक्येषु रेखाङ्कितानां पदानां अर्थं विकल्पेभ्यः चित्वा लिखत ।** **[4]**

(i) नास्ति **राग**समं दुःखम् ।
(अ) क्रोधः (ब) माया (क) मानः (ड) मोहः

(ii) अहम् अखण्डः **शाश्वतः** विभुः ।
(अ) सदैव (ब) श्वः भविष्यति (क) शशकवत् (ड) नित्यः

(iii) दुग्धधवलाः **मे** पक्षाः ।
(अ) मम (ब) माम् (क) मह्यम् (ड) मयि

(iv) **सपदि** उपायः क्रियताम् ।
(अ) शनैः (ब) अल्पं (क) शीघ्रं (ड) चिर्

**॥ यशस्वी भव 👍॥**